इति हेमचन्द्रः ॥ त्वगभङ्गः । इति मेदिनी ॥ (गन्धर्व्वविशेषः । यथा, हरिवंशे ।
"ऊर्णायुश्चित्रसेनश्च हाहा ऊहुश्च भारत ! ॥)
ऊर्णु, ञ ल आच्छादने । इति कविकल्पद्रुमः ॥ (अदां-उभं-सकं-सेट् ।) दीर्घादिर्दन्त्योपधः । रेफयोगान्मूर्द्धन्यः । तेन ऊर्णुनाव इत्यादौ निमित्ताभावान्मूलधातोर्णत्वाभावः । लञ ऊर्णोति ऊर्णौति ऊर्णुते दिशं मेघः । इति दुर्गादासः ॥ (यथा, भट्टिः । १४ । १०३ ।
"ऊर्णुनाव स शस्त्रौघैर्वानराणामनीकिनीम्" ॥)
ऊर्द्दरः, पुं, (ऊर्जेन बलेन दृणाति विदारयति । ऊर्ज+दृ+"ऊर्जिदृणातिरलचौ पूर्व्वपदान्त्यलोपश्च" । ५ । ४० । उणादिसूत्रेण अल् अत् वा । स्वरभेदार्थं प्रत्ययद्वयम् ।) शूरः । राक्षसः । इत्युणादिकोषः ॥ (कुसूलम् । धान्याद्याधारः । यथा, ऋग्वेदे । ३ । १४ । ११ ॥ "ऊर्द्दरं पृणता यवेनेद्धम्" । "ऊर्द्दरं कुसूलम्" इति भाष्यम् ॥)
ऊर्द्धः, त्रि, उपरि । उच्छ्रितः । तुङ्गः । इति अन्त्यस्थवकारान्तोर्द्ध्वशब्दार्थे मेदिनी ॥
अत्र ऊर्द्धशब्दो निर्व्विकारः । तदुक्तं वर्णदेशनायां । उज्जिहीते उद्गच्छति उदो हाडो डप्रत्ययः आदिवर्णस्य ऊरादेशः । इति मधुमाधवादयः ॥ इति मृदङ्गभेदोर्द्धकशब्दस्य टीकायां भरतः ॥ (यथा, महाभारते । मुद्गलज्ञानप्राप्तौ । ३ । २६० । २ ।
"ऊर्द्धगः सत्पथः शश्वद्देवयानचरो मुने" ॥)
ऊर्द्धकः, पुं, (ऊर्द्धः सन् कायतीति । ऊर्द्ध+कै शब्दे +क ।) ऊर्द्धकः । मृदङ्गविशेषः । इत्यमरटीकायां भरतमुकुटौ । (यथा शब्दार्णवे ।
"ऊर्द्धको गोपुच्छवत् सचितालोऽष्टाङ्गुलो मुखे ।
हस्तोर्द्धं वाद्यते तेषां वादनं दुर्जनं न वा" ॥
तथाच चिन्तामणौ ।
"हरीतक्याकृतिस्त्वङ्कस्तथालिङ्गो यवाकृतिः ।
ऊर्द्धको दण्डतुल्यः स्यात् मुरजा भेदतो मताः" ॥)
ऊर्द्धः, पुं, दण्डवत्स्थितः । यथा,—
"आसीन ऊर्द्धः प्रह्वो वा नियमो यत्र नेदृशः ।
तदासीनेन कर्त्तव्यं न प्रह्वेन न तिष्ठता" ॥
इत्यादि छन्दोगपरिशिष्टात् ॥ आसीनः उपविष्टः ।
"ऊर्द्धो दण्डवत् स्थितः प्रह्वोऽवनतपूर्व्वकायः" ।
इति श्राद्धतत्त्वम् ॥
ऊर्द्धः, त्रि, (उत+हा+ड । आदिवर्णस्य ऊरादेशः ।) उच्छ्रितः । तुङ्गः । उपरिष्टात् । इति मेदिनी ॥ ऊर्द्धशब्दो दीर्घादिः सवकारो निर्व्विकारश्च । तथाच उपरि भन्यते इति कृतनिरुक्तिरूर्द्धशब्दो वकारवानिति सुभूत्यादयः ॥
"कुर्व्वतीरुपलैस्तुङ्गैर्भुवनं नीचमूर्द्धजैः ।
तस्या चलालीवान्वेति चित्रानागचमूर्द्धजैः" ॥
इति कीचकवधयमकम् ॥ (यथा, कुमारे १।१६।)
"पद्मानि यस्याग्रसरोरुहाणि
प्रबोधयत्यूर्द्धमुखैर्मयूखैः" ।
ऊर्द्ध शब्दो मकारान्तोऽव्ययो दीर्घादिर्वकारवान् तथा अदन्तोऽनव्ययोऽपीति जयादित्यादयः ॥

ऊर्द्धकः, पुं, (ऊर्द्धः सन् कायति शब्दायते इति । ऊर्द्ध+कै+क ।) मृदङ्गविशेषः । यथा,—
"ऊर्द्धको गोपुच्छवत् स चितालोऽष्टाङ्गुलो मुखे ।
हस्तोर्द्धं वाद्यते तेषां वादनं दुर्ज्जनं मना" ॥
इति भरतधृतशब्दार्णवः ॥ अपिच । "हरीतक्याकृतिस्त्वङ्कस्तथालिङ्गो यवाकृतिः । ऊर्द्धको दण्डतुल्यः स्यान्मुरजा भेदतो मताः" ॥ अन्यटीकायान्तु । "यवमध्यस्तथोर्द्धकः" । इत्यमरटीकासारसुन्दरी ॥
ऊर्द्धकण्टी, स्त्री, (ऊर्द्धे कण्टः कण्टको यस्याः ।) महाशतावरी । इति राजनिर्घण्टः ॥ ("महाशतावरी चान्या शतमूल्यूर्द्धकण्टिका" । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
ऊर्द्धजानुः, त्रि, (ऊर्द्धे स्थूले जानुनी यस्य ।) उपरिभागे स्थूलजानुकः । तत्पर्य्यायः । ऊर्द्धज्ञुः २ । इत्यमरः ॥ (यथा, सांख्यायनश्रौतसूत्रम् ।१।५।८।
"उपविश्योर्द्धजानुः" । इति ॥)
ऊर्द्धज्ञः, त्रि, (ऊर्द्धे जानुनी यस्य । पृषोदरादित्वात् साधुः ।) ऊर्द्धजानुः । इति भरतो द्विरूपकोषश्च ॥
ऊर्द्धज्ञुः, त्रि, (ऊर्द्धे जानुनी यस्य । "ऊर्द्धात् विभाषा" । ५ । ४ । १३० । इति पक्षे ज्ञुः ।) ऊर्द्धजानुः । इत्यमरः ॥ (यथा, सांख्यायनश्रौतसूत्रम् । "ऊर्द्धज्ञुरनवानं यजति" ॥
तथाच माघे ११ । २१ ।
"त्वचमयमनुभूय स्वप्नमूर्द्धज्ञुरेव" ॥)
ऊर्द्धदेवः, पुं, (ऊर्द्धः तुङ्गः श्रेष्ठो देवः ।) विष्णुः । इति शब्दरत्नावली ॥
ऊर्द्धन्दमः, त्रि, (ऊर्द्धम्+दम्+खच् ।) ऊर्द्धस्थः ॥ इति त्रिकाण्डशेषः ॥ ऊर्द्धङ्गम इति युक्तिसिद्धपाठः ॥
ऊर्द्धपादः, पुं, (ऊर्द्धाः पादा यस्य ।) शरभः । इति शब्दरत्नावली ॥ (ऊर्द्धपदे, त्रि ॥)
ऊर्द्धपुण्ड्रः, पुं, (ऊर्द्धः पुण्ड्रः इव ।) तिलकविशेषः । स तु ब्राह्मणललाटे पुण्ड्रेक्षुवत् चन्दनादिना कृतोर्द्धरेखाचयः । यथा । "ऊर्द्धपुण्ड्रे त्रिपुण्ड्रं स्यात् त्रिपुण्ड्रे नोर्द्धपुण्ड्रकमिति" ।
"ऊर्द्धपुण्ड्रं द्विजः कुर्य्याद्वारिमृद्भस्मचन्दनैः" ।
इत्यादि च बहवः ॥
"ऊर्द्धपुण्ड्रं मृदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा ।
तिलकं वै द्विजः कुर्य्याच्चन्दनेन यदृच्छया ॥
ऊर्द्धपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियस्तु त्रिपुण्ड्रकम् ।
अर्द्धचन्द्रन्तु वैश्यश्च वर्त्तुलं शूद्रयोनिजः" ॥
इति आह्निकतत्त्वधृतब्रह्माण्डपुराणम् ॥ (ऊर्द्धपुण्ड्रधारिप्रशंसा यथा, ब्रह्मपुराणे ।
"अशुचिर्वाप्यनाचारो मनसा पापमाचरेत् ।
शुचिरेव भवेन्नित्यमूर्द्धपुण्ड्राङ्कितो नरः ॥
ऊर्द्धपुण्ड्रधरो मर्त्त्यो म्रियते यत्र कुत्रचित् ।
श्वपाकोऽपि विमानस्थो मम लोके महीयते" ॥
अस्य धारणे वैदिकद्विजभिन्न एवाधिकारी यदुक्तं देवीभागवते नारायणेन ॥
"ऊर्द्धपुण्ड्रं त्रिशूलं च वर्त्तुलं चतुरस्रकम् ।
अर्द्धचन्द्रादिकं लिङ्गं वेदनिष्ठो न धारयेत् ॥
जन्मना लब्धजातिस्तु वेदपन्थानमाश्रितः ।
पुण्ड्रान्तरं भ्रमादापि ललाटेनैव धारयेत् ॥
ख्यातिकान्त्यादिसिद्ध्यर्थं चापि विष्णवागमादिषु ।
स्थितं पुण्ड्रान्तरं नैव धारयेत् वैदिको नरः" ॥
श्राद्धे ऊर्द्धपुण्ड्रादिविधिनिषेधव्यवस्था । यथा, निर्णयसिन्धौ हेमाद्रिः ।
"जपे होमे तथा दाने स्वाध्याये पितृकर्म्मणि ।
तत्सर्व्वं नश्यति क्षिप्रमूर्द्धपुण्ड्रं विना कृतम्" ॥
तथा च नारदः ।
"यज्ञो दानं जपो होमः स्वाध्यायः पितृकर्म्म च ।
वृथा भवति विप्रेन्द्राः ! ऊर्द्धपुण्ड्रं विना कृतम्" ॥
इत्यादिवचनात् पैत्रे कर्म्मणि ऊर्द्धपुण्ड्रधारणं विहितम् । केचित्तु ।
'ऊर्द्धपुण्ड्रो द्विजातीनामग्निहोत्रसमो विधिः ।
श्राद्धकाले च संप्राप्ते कर्त्ता भोक्ता च वर्जयेत्" ॥
तथा,—
"वामहस्ते च ये दर्भा गृहे रक्तबलिस्तथा ।
ललाटे तिलकं दृष्ट्वा निराशाः पितरो गताः" ॥
इति संग्रहोक्तवचनात् तथा,—
"ऊर्द्धपुण्ड्रं त्रिपुण्ड्रं वा चन्द्राकारमथापि वा ।
श्राद्धकर्त्ता न कुर्व्वीत यावत् पिण्डान्न निर्वपेत्" ।
इति विश्वप्रकाशवचनाच्च श्राद्धकाले ऊर्द्धपुण्ड्रादिकं न धार्य्यमित्याहुः । तन्न, यतः कुलाचारादेव व्यवस्था । यत्तु,—
"ललाटे पुण्ड्रकं दृष्ट्वा स्कन्धे माल्यं तथैव च ।
निराशाः पितरो यान्ति दृष्ट्वा च वृषलीपतिम्" ॥
इति हेमाद्रिधृतवचनम् तत् गन्धत्रिपुण्ड्रकविषयम् । अतः श्राद्धकाले गन्धत्रिपुण्ड्रकमेव न धार्य्यः । अन्यत्पुनस्तु धार्य्य एव । तथा च व्यासः ।
"वर्जयेत्तिलकं भाले श्राद्धकाले च सर्व्वदा ।
ऊर्द्धपुण्ड्रं त्रिपुण्ड्रं वा धारयेत्तु प्रयत्नतः" ॥)
ऊर्द्धरेताः, [स्] पुं, (ऊर्द्धं रेतो यस्य न पतति वीर्य्यं यस्येत्यर्थः ॥) महादेवः । इति त्रिकाण्डशेषः । (अष्टोत्तरसहस्रनामान्तर्गतो महादेवस्य नामभेदः । यथा महाभारते १३ । १७ । ४५ ।
"ऊर्द्धरेता ऊर्द्धलिङ्ग ऊर्द्धशायी नभस्थलः" ॥)
भीष्मः । (कृतसमावर्त्तनोऽपि भीष्मदेवः पितुः काम्यविवाहार्थं वैवाहिकधर्म्मं त्यक्तवान् अतस्तस्य ऊर्द्धरेतस्त्वं जातम् । एतद्विवरणन्तु महाभारते १ । सत्यवतीलाभोपाख्याने १०० अध्यायो द्रष्टव्यम् ॥) मुनिविशेषः । तद्यथा । सनक-सनन्द-सनातन-सनत्कुमारादयः । (यथा, महाभारते २ । ब्रह्मसभावर्णने । ११ । ४९ ॥
"अष्टाशीतिसहस्राणि मुनीनामूर्द्धरेतसाम्" ॥
त्रि, विषयासङ्गरहितः । सन्न्यासी । यथा भारते शकुन्तलोपाख्याने,—
"ऊर्द्धरेता महाभागो भगवान् लोकपूजितः ।
चलेद्धि वृत्ताधर्म्मोऽपि न चलेत् संशितव्रतः" ॥)
ऊर्द्धलिङ्गः, पुं, (ऊर्द्धं लिङ्गं यस्य ।) महादेवः । इति हेमचन्द्रः ॥ (यथा, महाभारते १३ । १७ । ४५ ।
"ऊर्द्धरेता उर्द्धलिङ्ग ऊर्द्धशायी नभःस्थलः" ॥)
ऊर्द्धलोकः, पुं, (ऊर्द्धः उपरिस्थो लोकः ।) स्वर्गः । इति